श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवण्शठकोप श्रीश्रीनिवास यतीन्द्र महादेशिकैरनुगृहीतं

# ॥ श्री लक्ष्मीनृसिंह मङ्गळाशासनम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीनृसिंह मङ्गळाशासनम् ॥

अपारकरुणासिन्धो निवारणपरातिमान्।
विदारय हिरण्याक्षविदारण नखायुधैः ॥ 1 ॥

सर्ववेदान्तवेद्याय कारणाय महात्मने।
सर्वलोकशरण्याय श्रीनृसिंहाय मङ्गळम् ॥ 2 ॥

शेषिणे सर्ववस्तूनां वाञ्छितार्थप्रदायिने।
संश्रितानां सदा भूयात् श्रीनृसिंहाय मङ्गळम् ॥ 3 ॥

पवित्राणां पवित्राय प्रापकाय फलात्मने।
भद्राणामपि भद्राय श्रीनृसिंहाय मङ्गळम् ॥ 4 ॥

आदिवण् शठकोपाख्यैर्मुनिवर्यैर्महात्मभिः।
समर्चिताय नित्याय श्रीनृसिंहाय मङ्गळम् ॥ 5 ॥

जगज्जन्मादिलक्ष्याय स्वेच्छास्वीकृतमूर्तये।
विध्वस्ताखिलहेयाय श्रीनृसिंहाय मङ्गळम् ॥ 6 ॥

ज्ञानानन्दस्वरूपाय ज्ञानशक्त्यादिसिन्धवे।
बन्धवे सर्वलोकानां श्रीनृसिंहाय मङ्गळम् ॥ 7 ॥

कायाधव परित्राण भावित स्तंभ जन्मने।
ब्रह्मेन्द्रादिस्तुताय स्यात् श्रीनृसिंहाय मङ्गळम् ॥ 8 ॥

गुणलेशविहीनस्य सर्वहेयास्पदस्य मे।
मन्तून् क्षन्त्रेप्यनन्तान् स्यात् श्रीनृसिंहाय मङ्गळम् ॥ 9 ॥

श्रीनिवास यतीन्द्रोक्तं लक्ष्मीनृहरि मङ्गळम्।
ये पठन्ति महात्मानस्तेषां भूयात् तु मङ्गळम्॥ 10॥

॥ इति श्री लक्ष्मीनृसिंह मङ्गळाशासनं समाप्तम्॥